# Parasharamuniproktam Vishnu Stotram

# पराशरमुनिप्रोक्तं विष्णुस्तोत्रम्

## Document Information

Text title : Parasharamuniproktam Vishnu Stotram

File name : parAsharamuniproktaMviShNustotram.itx

Category : vishhnu, vishnu, viShNupurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : viShNupurANa | adhyAya 1/2/1-7, 68-70||

Latest update : October 2, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 2, 2024

*sanskritdocuments.org*

# पराशरमुनिप्रोक्तं विष्णुस्तोत्रम्

श्रीपराशर उवाच ।
अविकाराय शुद्धाय नित्याय परमात्मने ।
सदैकरूपरूपाय विष्णवे सर्वजिष्णवे ॥ १॥

नमो हिरण्यगर्भाय हरये शङ्कराय च ।
वासुदेवाय ताराय सर्गस्थित्यन्तकारिणे ॥ २॥

एकानेकस्वरूपाय स्थूलसूक्ष्मात्मने नमः ।
अव्यक्तव्यक्तरूपाय विष्णवे मुक्तिहेतवे ॥ ३॥

सर्गस्थितिविनाशानां जगतो यो जगन्मयः ।
मूलभूतो नमस्तस्मै विष्णवे परमात्मने ॥ ४॥

आधारभूतं विश्वस्याप्यणीयांसमणीयसाम् ।
प्रणम्य सर्वभूतस्थमच्युतं पुरुषोत्तमम् ॥ ५॥

ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः ।
तमेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम् ॥ ६॥

विष्णुं ग्रसिष्णुं विश्वस्य स्थितौ सर्गे तथा प्रभुम् ।
प्रणम्य जगतामीशमजमक्षयमव्ययम् ॥ ७॥

पृथिव्यापस्तथा तेजो वायुराकाश एव च ।
सर्वेन्द्रियान्तः करणं पुरुषाख्यं हि यज्जगत् ॥ ६८॥

स एव सर्वभूतात्मा विश्वरूपो यतोऽव्ययः ।
सर्गादिकं तु तस्यैव भूतस्थमुपकारकम् ॥ ६९॥

स एव सृज्यः स च सर्गकर्ता स एव पात्यत्ति च पाल्यते च ।
ब्रह्माद्यवस्थाभिरशेषमूर्तिर्विष्णुर्वरिष्ठो वरदो वरेण्यः ॥ ७०॥

इति विष्णुपुराणे प्रथमभगे द्वितीयाध्यायान्तर्गतं

पराशरमुनिप्रोक्तं विष्णुस्तोत्रं समाप्तम् ।

विष्णुपुराण । अध्याय १/२/१-७, ६८-७० ॥

viShNupurANa . adhyAya 1/2/1-8, 68-70..

Proofread by PSA Easwaran

*Parasharamuniproktam Vishnu Stotram*

pdf was typeset on October 2, 2024

Please send corrections to *sanskrit@cheerful.com*